**ताल(लि)कट** पु० देशभेदे स च देशः वृ० स० १४ अ० कूर्मविभागे दक्षिणस्यामुक्तः। अथ दक्षिणेनेत्युपक्रमे "का-लाजिनसौरिकीर्णताल(लि)कटाः"।

**तालकन्द** न० तालस्येव कन्दोऽस्य। तालमूल्याम् "कसेरु कोविदारश्च तालकन्दं तथाभिषम्" प्रा० त० वायुपु०। "तालकन्दं तालमूलीति प्रसिद्धम्" रघु०।

**तालकाभ** पु० तालकस्येवाभा यस्य। १हरितवर्णे हेम०। २तद्वति त्रि०।

**तालकी** स्त्री तालकस्येयम् अण् ङीप्। तालजमद्यभेदे(ताड़ी)

**तालकेतु** पु० तालस्तालचिह्नितः केतुरस्य। भीष्मे। "तासां प्रमुखतो भीष्मस्तालकेतुर्व्यरोचत" भा० उ० १४९ अ०।

**तालक्षीर** पु०तालजातं क्षीरमिव शुभ्रत्वात्। (तालेर चिनि) शर्करांभेदे राजनि०। स्वार्थे क। तालक्षीरक। तत्रार्थे।

**तालगर्भ** पु० ६त०। (तालेर मेति) तालमज्जनि। "अथ पित्तमृगाश्ववत्सदुग्धैः करिहस्तच्छिदये सतालगर्भैः" वृ० स० ५० अ०।

**तालङ्क** पु० ताड़ङ्क+डस्य लः। ताड़ङ्के भूषणे शब्दार्थचि०।

**तालचर** पु० १देशभेदे २तद्देशवासिषु ३तन्नृपेषु ब० व०। "अश्मकास्तालचराश्चैव चुचुपा रेणुपास्तथा" भा० उ० १३९ अ०।

**तालजङ्घ** पु० ताल इव जङ्घा यत्र। १देशभेदे २तद्देशवासिषु ३तन्नृपेषु च ब०व०। "स हैहयान् समुत्साद्य तालजङ्घांश्च भारत!" भा० व० १०६ अ०। "हैहयानामुदावर्त्तो नीपानां जनमेजय!। वकुलस्तालजङ्घानां कथाना-मुद्वतो वसुः" भा० उ० ७३ अ०। "तालजङ्घं महा-स्त्रमौर्वेणैकेन नाशितम्" भा० अनु० १५३ अ०। ४ग्रह-भेदे "निर्मांसास्तालजङ्घाश्च व्यादितास्याः भयङ्कराः" इत्युपक्रमे "एते ग्रहाश्च सततं रचन्तु मम सर्वतः" हरिवं० १६८ अ०। "कण्ठपृष्ठग्रीवाजङ्घञ्च" पा० अस्या-द्युदात्तता। [तालप्रलम्बे शब्दार्थचि०।

**तालजटा** स्त्री तालस्य जटेव। तालवृक्षस्य जटाकारे पदार्थे

**तालध्वज** पु० तालः ध्वजोऽस्य। बलदेवे "सरस्वत्या-स्तटे जातं नगं तालध्वजो बली" भा० श० ३८ अ०। "नातिदूरं ततो गत्वा नगं तालध्वजो बली" ५५ अ०। "अस्ति तालध्वजा नाम नगरी त्रिदशोपमेति" पद्मपु० क्रियायोगसारोक्ते २पुरीभेदे स्त्री।

**तालनवमी** स्त्री तालोपहारा नवमी शा० त०। भाद्र-शुक्लनवम्यां "मासि भाद्रपदे या स्यान्नवमी बहुलेतरा। तस्यां संपूज्य वै दुर्गामश्वमेधफलं लभेत्"। संवत्सरकौ० धृतगरुड़पुराणवचनम् इयमेव तालनवमी ख्याता

**तालपत्र** न० तालस्य पत्रमिव। १कर्णभूषणभेदे ताड़ङ्के। अमरः। ६त०। २तालस्य पत्रे च। "क्वचित् विधवयेव उन्मुक्ततालपत्रया" काद०।

**तालपत्रिका** स्त्री तालस्य पत्रमिव पत्रमस्याः ङीप् संज्ञायां कन् ह्रस्वः। तालमूलीवृक्षे राजनि०।

**तालपत्री** स्त्री तालस्य पत्रमिव पत्रमस्याः ङीप्। मूषिकपर्ण्याम् राजनि०। "अपामार्गोऽश्वगन्धा च तालपत्री सुवर्चला" सुश्रु०

**तालपर्ण** न०स्त्री० ताल इव खड्गमुष्टिरिव पर्णमस्य। १मुरानामद्रव्ये शब्दच०। स्त्रीत्वपक्षे पाककर्णेति ङीप्। सा च २मधुरिकायां जटाधरः।

**तालपुष्पक** न० तालःखड्गमुष्टिरिव पुष्पमस्य कप्। १प्रपौ-ण्डरीके शब्दर०। ६त०। २तालवृक्षकुसुमे च।

**तालप्रलम्ब** न० ताले वृक्षे प्रलम्बते प्र+लम्ब—अच्। ताल-वृक्षस्य जटायाम् राजनि०। तथा "तालप्रलम्बञ्च भङ्ग-क्षतरुजापहम्" राजनि०। [बलदेवे त्रिका०।

**तालभृत्** पु० तालं ध्वजरूपेण बिभर्त्ति भृ—क्विप् ६त०।

**तालमर्द्दल** पु०तालस्य तालार्थं मर्द्दल इव। १वाद्यभेदे हारा०

**तालमूली** स्त्री०तालस्य मूलमिव मूलमस्याः ङीप्। मुषल्याम्। स्वार्थे क। तालमूलिका २दीर्घकन्दायायाम्। मुषल्याम्। "तालमूली तु विद्वद्भिर्मुषलीति निगद्यते। मुसली मधुरा वृष्या वीर्य्योष्णा बृंहणी गुरुः। तिक्ता रसायनी हन्ति गुदजान्यनिलं तथा" "क्रौञ्चोद्धरासभा-स्थीनि श्वदंष्ट्रातालमूलिका। अजमोदा कदम्बस्य मूलं नागरमेव च" सुश्रु०।

**तालयन्त्र** न० सुश्रुतोक्ते शल्योद्धारणार्थे यन्त्रभेदे। "तालयन्त्रे द्वादशाङ्गुले मत्स्यतालवदेकतालद्वितालके कर्णनासानाड़ीशल्यानामाहरणार्थम्" सुश्रु०।

**तालरेचनक** पु०तालेन रेचयति चु० रिच—ल्यु स्वार्थे क। नटे शब्दर०। तालवेचनकेति तत्र पाठान्तरम् तत्रार्थे।

**तताललक्षण** पु० तालो लक्षणं ध्वजोऽस्य। बलरामे हेमच०।

**तालवन** न० ६त०। वृन्दावनस्थे तालप्रचुरे वनभेदे "गो-वर्द्धनस्योत्तरतो यमुनातीरमाश्रितम्। ददृशाते ततो वीरौ रम्यं तालवनं महत्" हरिवं० ७० अ०। २तालानां वने च। "सुरक्ततालवनानीव स चकार रथव्रजान्" भा० भी० ११७ अ०।

**तालवृन्त** न० ताले करतले वृन्तं बन्धनमस्य, तालस्येव वृन्त-